Reg. No. : 916/09 ISSN : 2249-0841

# Śodha Cetanā

A Research Journal

# शोध चेतना

शोध पत्रिका

Vol. II No.4 Mar.2013

JAGO JAN SEVA SAMITI, VARANASI

II

**सूचना के अधिकार के प्रति बुन्देलखण्ड विश्वविद्यालय परिसर झाँसी के अध्ययनरत् विधि स्नातक एवं शिक्षा स्नातक के विद्यार्थियों के दृष्टिकोण का तुलनात्मक अध्ययन**
*योगेश कुमार पाल* 54-60

**खेलों में भ्रष्टाचार : प्रतिभावान खिलाड़ियों की चुनौती**
**गोपेश कुमार सिंह, **गिरजा सिंह* 61-66

**संस्कृत साहित्य में चतुर्भाणी संस्कृति**
*डॉ. सुरेश* 67-72

**डॉ0 राम मनोहर लोहिया और जाति तोड़ो आन्दोलन**
*डॉ0 सुरेश प्रसाद* 73-75

**क्रीड़ा के क्षेत्र में ग्रामीण महिलाओं की समस्यायें**
*लेफ्टिनेन्ट डॉ0 मुन्ना सिंह [1], अच्छे लाल यादव [2], महानन्द यादव [3]* 76-78

**षडास्तिकदर्शनेषु सृष्टिविज्ञानम्**
*बी. उमामहेश्वरी* 79-84

**हसदो बेसिन (छत्तीसगढ़) में सापेक्षिक उच्चावच का एक भौगोलिक विश्लेषण**
*गोविन्द कुमार यादव* 85-94

**महाभारत का सांस्कृतिक वैशिष्ट्य**
*दिलीप कुमार* 95-98

हरिवंश राय बच्चन और उनकी मधुशाला के विभिन्न दृष्टिकोण
*डॉ0 रेनू राय* 99-105

# षडास्तिकदर्शनेषु सृष्टिविज्ञानम्

*बी. उमामहेश्वरी*[*]

**शोधसारः :–**

आस्तिकदर्शनानि कानि, तेषु दर्शनेषु सृष्टेः प्रकारः कस्मिन् दर्शने कथं वर्णितम्, सृष्टेराधारः कः, सृष्टेः निमित्तकारणं किम्, सृष्टिसत्त्वे प्रमाणं किम्, तस्यकर्ता कः, प्रकृतिः कीदृशी, पुरुषः कः, एकादशेन्द्रियाणि कानि, पञ्चमहाभूतानि कानि, पञ्चतन्मात्राणि कानि, एतानि सर्वानि कुत आयातानि, पुनः कुत्र लयं यान्ति,सृष्टेः कारणं किम्, वेदेषु कथं वर्णितम्, उपनिषत्सुसृष्टिःकथं वर्णितमित्यादयो अनेक विषयाः प्रतिपादिताः भवन्ते।

**शोधप्रबन्धः :–**

तत्र आस्तिकदर्शनानि न्यायवैशेषिकसाङ्ख्ययोगमीमांसावेदान्तदर्शनानि। तत्र यावद्विश्वस्यापि प्रथमं शास्त्रं वेदो भवति। वेदः पौरुषेयो वा अपौरुषेयो वा इत्यत्र केचन पौरुषेय इति केचन अपौरुषेय इति दार्शनिकाः स्वीकुर्वन्ति। तथापि सर्वे दार्शनिकाः वेदस्य सृष्टेः प्रक्तनत्वम् अङ्गीकुर्वन्ति। तत्र वेदस्य अपौरुषेयता वेदे एव दृश्यते यथा–

तस्माद्यज्ञात्सर्वहुतः, ऋचस्सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्मात्, यजुस्तस्मादजायत।। इति।[1]

अस्माकं वेदस्य निर्माणकालविषये यावन्तःपरस्पर मतभेदाः दृश्यन्ते तानि सर्वान्यपि सृष्टेः वास्तविकावस्थाया अज्ञातार्थं कारणानि भवन्ति। उपर्युक्त पुरुषसूक्ताधारेण वेदस्य सृष्टेः प्राक्तनत्वं स्पष्टोभवति।

विश्वस्य सृष्टेः विषये वेदे अनेकप्रकारविचारः दृष्टिगोचराः भवन्ति। अस्य कारणमयं भवति यत् साधकाः स्वकार्यसिद्ध्यर्थं कमपि देवतामाश्रयन्तः, तं देवतां जगतः स्रष्टृत्वेन ध्यातवन्त। अनेनैवकारणेन वेदे जगत्सृष्टेः विषये विभिन्नवर्णनानि दृश्यन्ते। तत्र तत्र पृथ्वी, अन्तरिक्षं, द्यौः, दिशाः तथ अहोरात्र्यादिकमुत्पन्नानीति कथितं वर्तते। एवं प्रकारेण विभिन्नमन्त्रेषु भिन्नभिन्नदेवताः यथा त्वष्ट्रा इन्द्र वरुण विश्वकर्मादयः चराचरविश्वस्य सृष्टेः कारणरूपेण उक्तमस्ति।

तत्रेदानीं दर्शनेषु सृष्टेः विषये किमुक्तमस्तीति गवेक्षणं कुर्मः। मुख्यतः सर्वेषामपि दर्शनानां प्रयोजनं (मुक्ति) मोक्ष एव भवति। तत्र सृष्ट्युत्पत्तेः विषये नैयायिकानामयमाशयः यथा ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जायते। ततः परमाणुद्वयसंयोगेन द्वयणुकमुत्पद्यते। त्रिभिः द्वयणुकैः त्र्यणुकम्, एवं चतुर्भिः त्र्यणुकैः

[*] शोधच्छात्रा, वैदिक दर्शन विभाग, संस्कृतविद्याधर्मविज्ञानसङ्काय, काशी हिन्दू विश्वविद्यालय

चतुरणुकादिक्रमेण कपालतन्तूनां, ततः महापृथिवीजलाग्निवाय्वाकाशप्रभृति समस्तविश्वस्य सृष्टिरुत्पद्यते इति।[2] तं प्रति ईश्वरस्य निमित्तकारणत्वं, जगत्कर्तृत्वं च अङ्गीकुर्वन्ति।

तत्र नैयायिकाः वस्तुनः सिद्धिं प्रमाणेनैव स्वीकुर्वन्ति। यतो हि "प्रमाणं विना न वस्तुसिद्धिः" इति नियमात्। तत्र सृष्टिप्रलयास्तित्वे अनुमानं प्रमाणमिति दर्शयन्ति यथा– "विश्वसन्तानोऽयं, दृश्यसन्तानशून्यैः समवायिभिरारब्धः, सन्तानत्वात्, आरणेयसन्तानवत्"[3] इति।अस्मिन् अनुमाने विश्वसन्तानपदेन कार्यसमूहो बोध्यः। यश्च द्व्यणुकरूपात् आद्यावयविनमारभ्य घटादिरूपान्त्यावयविपर्यन्तं यावत् कार्यकारणरूपेणावस्थितः। दृश्यसन्तानशून्यसमवायिनो नाम परमाणवः। तैरुत्पन्न इत्यर्थः। तथा च इदानीन्तनघटादि दृश्यमानमृत्पिण्डादिकार्यसन्तानवत्परमाणुना उत्पन्नः। किन्तु एतादृशः कश्चन समय आसीत् यत्रानारब्धकार्यपरमाणुसमूहेन आरब्धः सः। यथा अरणिकाष्ठात् समुत्पन्नो वह्निसन्तानः परवर्तिनिसमये दृश्यसन्तानवत् वह्निपरमाणुतो यद्यपि समुत्पन्नो भवति तथापि प्रथमजातो वह्निः दृश्यसन्तानशून्यपरमाणुसमूहादुत्पन्न इति भावः।

अत्र अन्यदपि प्रमाणं दर्शयन्ति यथा– "वर्तमानब्रह्माण्डपरमाणवः पूर्वमुत्पादितसजातीयसन्तानान्तरा, नित्यत्वे सति तदारम्भकत्वात्, प्रदीपपरमाणुवत्" इति। अत्रायमभिप्रायः– अस्य ब्रह्माण्डस्य ये परमाणव उत्पादकाः ते एव एतस्य सजातीयब्रह्माण्डस्योत्पादकाः, परमाणूनां नित्यत्वात् ब्रह्माण्डोत्पादने शक्तत्वात् प्रदीपपरमाणुवदिति अनुमानद्वयेन सृष्टेः अस्तित्वं प्रतिपादयन्ति।

सतोविद्यमानादेव प्रधानात् सत् विद्यमानमेव महदादि चतुर्विंशति तत्त्वानि परिणमन्ते। सांख्यतत्त्वकौमुद्यां यथा,

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि।।[4]।

अर्थात् प्रकृतिः त्रिगुणात्मिका भवति। त्रिगुणानां साम्याभावात् महदुत्पद्यते। ततः अहङ्कारो जायते। एवं क्रमशः(श्रोत्र,त्वक्,चक्षु,रसन,घ्राणेति पञ्च ज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थेति पञ्च कर्मेन्द्रियाणि, मनः इति) एकादशेन्द्रियाणि, (शब्दस्पर्शरूपरसगन्धानीति)पञ्चतन्मात्राणि, (आकाशवायुरग्न्यापपृथिवीति)पञ्चमहाभूतानि, ततः पुरुष इत्येवं प्रकारेण परिणमते। यतश्च सृष्टिचक्रं चलति। सत्त्वरजस्तमोमयी हि प्रकृतिर्माया, "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादयो श्रुतयः सिद्धान्ते सङ्गच्छन्ते। इन्द्रः पुरुषः मयाभिर्महदादि प्रकृतिभिः बहुतां गच्छति।

"अजामेकां लोहितशुक्लकृष्णां वह्वीः प्रजा सृजमानां सरूपाः।
अजोह्येको नुषमाणोऽनुशेते नहात्येनां भुक्तभोगा भुजोऽन्यु"।।

इति श्रुत्यनुसारी सांख्यनयश्चलतीति सर्वत्र भागवतादि वैदुष्यद्योतकशास्त्रेषु अस्यैव सांख्यदर्शन सिद्धान्तस्य चर्चा दृश्यते।

साङ्ख्ययोगदर्शनयोः प्रयोजनं तत्त्वज्ञानं भवति। तत्त्वज्ञानं कैवल्य(मोक्ष)प्राप्त्यर्थं मुख्यकारकं भवति। इदं तत्त्वज्ञानं कस्य? संसारस्य वा स्व आत्मनः उत जडचेतनत्त्वस्य? इति जिज्ञासूनां ज्ञानार्थं, साङ्ख्यदर्शने सृष्टिप्रलयमाध्यमेन समाधानानि परिष्कृतानि।

अर्थात् विश्वस्य सृष्टिः कथमभवत्, सृष्ट्यनन्तरं किं भविष्यति इत्येता दृशानां वर्णनमेव साङ्ख्यदर्शनस्य उद्देश्यो भवति। एतेषां सिद्धान्ते कार्यकारणयोः वास्तविकरूपेण भिन्नता नास्ति। कारणमेव कार्यरूपेण अभिव्यक्तो भवति।

तत्र नैयायिकानां तु तद्विपरीतं भवति यथा एते कार्यकारणयोः सत्तां नितान्तं भिन्नरूपेण स्वीकुर्वन्ति। अत एव एतान् असत्कार्यवादिनः इति वदन्ति। साङ्ख्ययोगद्वारा स्वीकृतमतो भवति सत्कार्यवादः। अयं विशेषतः प्रकृतिपरिणामवादरूपेण प्रसिद्धो भवति। सत्कार्यवादानुसारं कार्यं सद्भवति, सदेव(कार्यमेव) स्वकारणे विद्यमानो भवति। अयं कस्यापि नवीनस्य वस्तुनः उत्पत्तिर्नास्ति, किन्तु अव्यक्तस्य व्यक्तावस्थैवेति तेषां सिद्धान्तः।[5]

अनाद्यविद्यवशात् यदा पुरुषप्रकृत्योः संयोगः सम्भवति तदा सृष्टिः जायते। पुरुषप्रकृतिसंयोगात् प्रप्रथमं बुद्धिः जायते। बुद्धेः अहङ्कारः जायते। एवं क्रमशः एकादशेन्द्रियाः, पञ्चतन्मात्राः, पञ्चमहाभूताश्च जायन्ते। योगशास्त्रे महदेव बुद्धिः, अस्मिता एव अहङ्कारः। इतः पाञ्चभौतिकजगत्यां विभिन्नपदार्थरूपपरिवर्तनं सदा प्रचलति। पञ्चमहाभूतपर्यन्तं यः प्रकृतिपरिणामः वर्तते सः तत्त्वान्तरपरिणाम इति कथ्यते। पञ्चमहाभूतेभ्यः या भौतिकसृष्टिर्जायते सा न च नूतनतत्त्वाभिव्यक्तिः, प्रत्युतस्थितं तद्धर्मिणः धर्मपरिवर्तनमेव आयाति इति। एष धर्मपरिणाम उच्यते यथा, चूर्णरूपमृदः मृत्पिण्डवत् परिणमति। कपालरूपेण मृत्पिण्डः परिवर्तते। कपालद्वयसंयोगेन घटरूपमभिव्यज्यते। एट धर्मान्तरोत्पत्तिः भवति, न तु तत्त्वान्तरोत्पत्तिः। उच्यते योगसूत्रभाष्यकारैः–

"न विशेषेभ्यः परं तत्त्वान्तरमस्तीति विशेषाणां नास्ति तत्त्वान्तरपरिणामः। तेषां तु धर्मलक्षणावस्थापरिणामा व्याख्यायिष्यन्ते" इति।[6]

येतेषा धर्माणा लक्षणपरिणामो भवति। एकस्मिन् धर्मिणि एको धर्मः अनागतलक्षणरूपेण (भविष्यकाले) भवति। पश्चात् लक्षणपरिणामद्वारेण पूर्वलक्षणं (कालं) त्यक्त्वा स धर्मः वर्तमानलक्षणे (वर्तमानकाले) आयाति, तत्पश्चात् लक्षणपरिणामस्यैव फलस्वरूपः धर्मः अतीतलक्षणं प्रप्स्यति। एषः धर्माणां लक्षणपरिणामः। योगदर्शने सृष्टेः प्रक्रिया सांख्यदर्शनानुसारेणैव स्वीक्रियते। किन्तु अनयोर्दर्शनयोरयं पृथक्त्वं वर्तते यत् सांख्यदर्शने प्रकृतिपुरुषयोः संयोगेन सृष्टिः भवति, तत्र संयोगार्थं कस्यापि कारणत्त्वम् उत अधीनत्वं किमपि न भवति किन्तु तत्र संयोगः स्वयमेव भवतीति। परन्तु योगदर्शने सृष्टेः विषये प्रकृतिपुरुषयोः संयोगे ईश्वरस्येच्छां स्वीकुर्वन्ति। विना ईश्वरेच्छया कदापि प्रकृतिपुरुषयोः संयोगो नैव भवति अतः सृष्टिप्रक्रियायां

ईश्वरम्मुख्यतत्त्वरूपेण ङ्गीकुर्वन्ति। स एव ईश्वरः सर्वप्राणिणामाधारभूतः,सर्वप्राणिणः तस्याधीनस्था इति कथयन्ति। गीतायाः श्लोकमपि द्रष्टुं शक्यते यथा.

"सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि" इति।[7]

अस्मिन् योगशास्त्रे लक्षणं नाम काल इत्युच्यते। "लक्ष्यते प्रकाश्यते अनेनेति" काललक्षणं निर्वचयन्ति। अत्र 'एकः पुरुषः' अपरिणामी, अन्यद्यत्किञ्चिज्जगत् नित्यपरिणामशीलः। अव्यक्तप्रकृतिः गुणत्रयाणां अलिङ्गपरिणामः। महत्तत्वन्तु लिङ्गपरिणामः। अस्मिता एवं पञ्चतन्मात्राः गुणानामविशेषपरिणामाः। एकादशेन्द्रियाः पञ्चमहाभूताश्च गुणानां विशेषपरिणामाः। पुरुषस्तु निर्गुणो चिन्मात्रश्चेति एतेषां सिद्धान्तः।अस्य सत्कार्यवादस्य दृढार्थं पुष्ट्यर्थं च कारणान्येतानि दर्शयन्ति–

असदकारणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शकतस्य शक्यकरणात् कारणाभावाच्च सत्कार्यम्।।[8]

साङ्ख्यशास्त्रानुसारं प्रकृतिरेव समस्त सृष्टेः मूलकारणं भवति। तत्र प्रकृतिः प्रधानपदेन वेदनीया मूलप्रकृतिः। इयं प्रकृतिः कस्याप्यन्यस्य विकृतिर्नास्ति। प्रकरोतीति प्रकृतिरिति व्युत्पत्त्या सत्वरजस्तमोगुणानां साम्यावस्थाभवति।[9] तदुक्तं

"मूलप्रकृतिरविकृतिः"।[10]

महदादि कार्यसमूहस्य असौ प्रकृतिः मूलं भवति। यदि अस्य प्रधानस्यापि मूलं यत्किमपि अन्यत् यदि स्वीकुर्मः तर्हि तम् प्रते, तम् प्रतीति अनवस्थादोशो भवेत्। अतः अस्य प्रधानस्य मूलं किमपि नास्तीति एतेषां सिद्धान्तः। एते प्रकृति पुरुषयोः अनादित्वं स्वीकुर्वन्ति गीतायामपि उक्तमस्ति यथा–

"प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि"[11] इति।

ब्रह्मसूत्रग्रन्थे विवर्तवादाधारेण बादरायणमहर्षिभिः सांख्यमतस्य परिणामवादपोषकं प्रकृतिसृष्टिवादं खण्डयद्भिः "शास्त्रयोनित्वात्" [12], "तत्तुसमन्वयात्"[13], इत्युपक्रम्य "ईक्षतेर्नाशब्दम्"[14] इत्यादिभिः सूत्रैः ब्रह्मसृष्टिवाद आनीतः। तत्रोपनिषद्वाक्याण्यथा–

"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति।
यत्प्रयन्त्यभिसंविशन्ती"त्युपक्रम्य, "तदैक्षत बहुस्यां प्रजायेय", इत्यादि।
ऋग्वेदे यथा–

"आत्मा वारे! इदमेक एवाग्र आसीन्नान्यत् किञ्चनमिषम्।
स ऐक्षत लोकानसृजा इति स लोकानसृजत।। इति
तैत्तिरीयोपनिषद्यथा,

"सत्यं ज्ञानमनन्तं ब्रह्मे"त्युपक्रम्य, "तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्यादोषधयः। ओषधिभ्योऽन्नम। अन्नात्पुरुषः प्रजाः" इति सच्चिदानन्द स्वरूपब्रह्मण एवेयं सृष्टिरिति श्रूयते। न तु कस्यापि जडप्रकृतेः सृष्टिरिति।

तत्र वेदान्तदर्शनस्य तु 'जीव जगत् तथा ब्रह्म' एतेषां स्वरूपनिरूपणमेव विषयो भवति। अस्मिन् दर्शने प्रकृति तथा असंख्य रूपपुरुषाणां समावेशः एकस्मिन्नेव परमतत्त्वे परब्रह्मणि अविभक्तरूपेण जडचेतनरूप द्वैतस्थाने अद्वैतस्य स्थापनं कुर्वन्ति। ततः सांख्ये सृष्टेः कारणं यत् 'प्रकृति पुरुषयोः संयोगः' इत्युक्तं तमपि असङ्गतमिति. त्वा केवलमेक एव परमतत्त्वं "तदब्रह्म, स आत्मा"[15] इति ब्रह्मणः स्वरूपं प्रतिपादयन्ति। ब्रह्मणोजगतः आभिन्नोपादाननिमित्तकारणमेति मन्यन्ते। इयं लोकेऽपि प्रसिद्धैवास्ति अभिन्नोपादानकारणता यथा–

"यथोर्णनाभिसृजते गृह्णते च यथापृथिव्यामोषधयस्सम्भवन्ति"।
यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम्।।16।

इति सच्चिदानन्दपरमात्मा स्वयं प्रपञ्चं सृष्ट्वा पुनः स्वस्मिन्नेव लीनोभवति यथा ऊर्णनाभिं इति दृष्टान्तेन जगतः कर्तृत्वस्हाररूप कार्यद्वयस्यापि कारणं दर्शितवन्तः। वेदान्तमतानुसारं ब्रह्म जगतः निम्त्तिकारणं तथा उपादानकारणं च भवति। दृश्यरूपमिदं जगत् परिणामशीलः तथा अनित्यश्च। जगतः तथा सृष्टेः विषये वेदान्तिन नैयायिकाना 'मारम्भवादं' अर्थात् ईश्वरस्य जगतः कर्तृत्वम्, तथा सांख्यानां 'परिणामवाम्दः' अर्थात् सृष्टेः विकासोत्तरं विकारेण उत परिणामद्वारा अव्यक्त प्रकृतिः स्व स्व कर्यरूपानुसारं परिणतां प्राप्नोति इति एतत्पक्षद्वयस्थाने वेदान्तिनः 'विवर्तवादं' अर्थात् दृश्यमानजगदिदं ब्रह्मणः विवर्त उत कल्पितरूप इति, अमुं विषयं इतोऽपि स्पष्टतया व्यक्तीकर्तुं दृष्टसृष्टिवादमपि स्वीकुर्वन्ति। अस्यानुसारं मायारूपा उत नामरूपाः मनसः वृत्तयः। सृष्टिं तावत् मन एव करोति, मन एव पश्यति। यदि मनसः वृत्तयः शान्तिं प्राप्नुवन्ति तर्हि तदनन्तरं कैवल्यप्राप्तिरेवेति दार्शनिकानाम्मुख्याशयमुक्त्वा विरम्यते विस्तरात्।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धायविषयासक्तं मुक्त्यै निर्विषयं मनः।[17]

1. ऋग्वेदं. पु.सू.4.
2. त.मृ.पृ.10
3. न्या.कु
4. सा.त.कौ.22
5. सा.त.कौ.56
6. यो.सू.2–19. भा.पृ.225.
7. भ.गीता.6–29.
8. सा.त.कौ. पृ.9
9. स.द.सं. पृ.528
10. सां.का.3
11. श्रीभ.गी.अ.13 श्लो.19
12. ब्र.सू.1.1.3

13. ब्र.सू.1.1.4

14. ब्र.सू.1.1.5

15. तै.उ.1.1.6

16. मु.उ.1.1.7

17.पञ्चदशी.

**सन्दर्भ ग्रन्थसूची:–**

1. मन्त्रपुष्पम्, तैत्तिरीयारण्यके,पुरुषसूक्ते, स्वमी देवरूपानन्दः, रामकृष्णमठ, खर, मुम्बई,2000.

1. तर्कामृतम्, जगदीशभट्टाचार्यः, चौखम्बा विद्याभवन, वाराणसी।

3. न्यायकुसुमाञ्जलिः, उदयनाचार्यः।

4. सांख्यतत्त्वकौमुदी, डॉ.आद्याप्रसाद मिश्रः, सत्यप्रकाशन, बलरामपुर हाउस, इलहाबाद,1966.

5. सर्वदर्शनसंग्रहः, माधवाचार्यः, भाष्यकारः प्रो०उमाशंकर शर्मा, चौखम्बा विद्याभवन, वाराणसी 2012

6. सांख्यतत्त्वकौमुदी, वाचस्पतिमिश्र, चौखम्बा सुरभारती प्रकाशन, वाराणसी,1992.

7. श्रीमद्भगवद्गीता।

8. तैत्तिरीयोपनिषत्।

9. मुण्डकोपनिषत्।

10. पातञ्जलयोगदर्शनम्, व्यासभाष्यसंवलितम्, चौखम्भा सुरभारती प्रकाशनम्, वाराणसी।